दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णपञ्चमी
श्रावण 18 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-284 | 1 | अगस्त 03, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 Chamba Minjjar Fair - चम्बायां अन्ताराष्ट्रिय-मिञ्जर-मेलापकस्य समापनम्, मुख्यमंत्रिणा सुक्खुना कृतं शोभायात्रायाः नेतृत्वम्

3 आई.आई.टी.-मण्डी-संस्थानस्य अनुसन्धाने महती अभिव्यक्तिः, धान्यस्य कृष्या वर्धितः पञ्जाबस्य भूजल-सङ्कटः

5 राष्ट्रमण्डल-क्रीडाः २०२६ पुरुष-दीर्घकूर्दने मुरली-श्रीशङ्करेण रजतपदकं जितम्

## अन्ताराष्ट्रीयवार्ता

### अमेरिका-देशः इरान्-देशस्य उपरि प्रस्तावितं सैन्याक्रमणं स्थगयितुं सम्मतः



अमेरिका-देशः इरान्-देशस्य उपरि प्रस्तावितं सैन्य-आक्रमणं स्थगयितुं सम्मतः अभवत्। अमेरिका-राष्ट्रपतिः डोनाल्ड ट्रम्पः अवदत् यत् तस्य देशः सैन्य-कार्याचरणाय पूर्णतया सज्जः आसीत्, किन्तु कूटनीतिक-वार्तायाः अवसरं दातुं प्रहारः स्थगितः। इरान्-देशेन अन्यैः च देशैः अमेरिका-सर्वकारः सैन्य-कार्याचरणं स्थगयितुं प्रार्थितः आसीत्।

## प्रधानमन्त्रिणा 'नशामुक्त-युवा-विकसित-भारत-सङ्कल्प-अभियानस्य' उद्घाटनं कृतम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदेहल्यां आभासीयमाध्यमेन 'नशामुक्त-युवा-विकसित-भारत-सङ्कल्प-अभियानस्य' उद्घाटनं कृतम्। अस्मिन् अवसरे सः अवदत् यत् विकसितभारतस्य निर्माणाय राष्ट्रस्य युवानः शारीरिकरूपेण स्वस्थाः, मानसिकरूपेण दृढाः, आत्मविश्वासेन युक्ताः च भवेयुः। सः यूनां मादकद्रव्येभ्यः दूरे स्थातुं स्वस्थजीवनशैलीं च पालयितुं सन्देशम् अयच्छत्। एषः उपक्रमः मादकद्रव्याणां व्यसनस्य विरुद्धं शत-सप्ताहानां राष्ट्रव्यापी जनसहभागितायाः कार्यक्रमः अस्ति। प्रधानमन्त्रिणा गृहीतम् यत् व्यसनं न केवलं परिवारान् नाशयति, अपि तु राष्ट्रस्य शक्तिम् अपि दुर्बलां करोति। अतः परिवारेषु एतादृशानां प्रकरणानां निगोपनं न कर्तव्यम्, अपि तु समयोचितं चिकित्सकानाम् तज्ज्ञानां च साहाय्यं ग्रहीतव्यम्।



### पञ्जाब-राज्ये मद्यमुक्त-युवा-अभियानम्

पञ्जाबराज्यस्य सप्त-शैक्षणिकसंस्थानां सहस्रशः छात्राः 'विकसितभारत-सङ्कल्प-अभियाने' उत्साहेन भागम् अगृह्णन्। अस्मिन् बहवः राष्ट्रीय-सेवा-योजनायाः (NSS) स्वयंसेवकाः अपि आसन्। सर्वेषां मतम् आसीत् यत् मादकद्रव्यमुक्तस्य देशस्य निर्माणाय एतादृशानां अभियानानां वर्धनं समाजस्य सामूहिकं दायित्वम् अस्ति

## सुभाषितम्

**इक्षोरग्रात्क्रमशः पर्वणि, पर्वणि यथा रसविशेषः।**
**तद्वत्सज्जनमैत्री, विपरीतानां च विपरीता॥**

भावार्थः- भावार्थः- जिस प्रकार गन्ने में उसके सिरे से क्रमशः उसके मूल की ओर बढ़ते हुए विभिन्न गांठो में रस की मात्रा और मिठास बढ़ती जाती है उसी प्रकार सज्जन व्यक्ति भी अपने विरोधी व्यक्तियों से इसी प्रकार का व्यवहार करते हैं अर्थात् बाद में विरोध कम या समाप्त होने पर उसी प्रकार उनकी मित्रता भी और प्रगाढ़ तथा सुखद हो जाती है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ता
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

### व्यापकवृद्ध्या सह वस्तुसेवाकरस्य (GST) राजस्वसङ्ग्रहे महती प्रगतिः नवदिल्ली:

**हिमसंस्कृतवार्ताः:- रवि खरिडेहालः।**

देशे आर्थिकगतिविधीनां जीवन्ततायाः फलस्वरूपं वस्तुसेवाकरस्य (GST) राजस्वसङ्ग्रहे पुनः एका विशिष्टा वृद्धिः दर्शिता अस्ति। हिमसंस्कृतवार्तानां प्रतिनिधिना रवि-खरिडेहालेन प्रदत्तस्य प्रतिवेदनस्य अनुसारं, देशस्य आन्तरिक-उपभोगेन सह एव आयातेभ्यः प्राप्तेन करेण अस्यां वृद्धौ महद् योगदानं कृतम्।अस्मिन् वर्षे जुलै (०७) मासे सङ्गृहीतं करराजस्वं गतवर्षस्य अस्यैव कालखण्डस्य अपेक्षया १५% अधिकं वर्धितम् अस्ति। जुलै मासे प्रस्तुतं राजस्वसङ्ग्रहस्य प्रतिवेदनं स्पष्टयति यत् जून (०६) मासे व्यापारिकक्षेत्रे वस्तूनाम् उपभोगः तथा च सेवानाम् उपयोगः महता प्रमाणेन अभवत्। अस्मिन् मासे आहत्य २.११ लक्षकोटि-रूप्यकाणां (2.11 Lakh Crore) करराजस्वं सङ्गृहीतम्।एषा वृद्धिः केवले एकेन द्वाभ्यां वा प्रदेशाभ्यां सीमिता नास्ति, अपि तु व्यापकरूपेण दृश्यते। देशस्य ३६ राज्येषु केन्द्रशासितप्रदेशेषु च २८ प्रदेशेषु करसङ्ग्रहे ऊर्ध्वगतिः दर्शिता। एतेन कर-आधारस्य गभीरता तथा च भारतीयविपणेः सुदृढा जीवन्तता प्रकर्षेण सिध्यति।



### केरलराज्ये निरन्तरं जायमानया अत्यधिकवृष्ट्या महती क्षतिः अभवत्

केरलराज्ये निरन्तरं जायमानया अत्यधिकवृष्ट्या महती क्षतिः अभवत्। अस्मिन् अपघाते अष्ट जनाः मृताः, सहस्रशः जनाः च सुरक्षा-शिभिरेषु नीताः। भारतस्य ऋतु-विभागेन १२ मण्डलेषु 'पीत-सङ्केतः' (Alert) दत्तः अस्ति। राज्यसर्वकारस्य अनुसारं २७ गृहाणि पूर्णतया, प्रायः द्विशतं गृहाणि च आंशिकरूपेण क्षतिग्रस्तानि अभवन्।

### ओडिशा-राज्ये जलप्लावनस्य स्थितिः

ओडिशाराज्ये महानद्याः जलस्तरस्य ह्रासेन जलप्लावनस्य स्थितिः शनैः शनैः सामान्या भवति। परन्तु उत्तर-ओडिशा-प्रदेशे जलप्लावनेन कृषिसस्यानां जीवनोपायानां च महती क्षतिः अभवत्। सर्वकारेण राहत-कार्यं पुनःस्थापन-कार्यं च तीव्रतया क्रियते।

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## राष्ट्रपतिभवनस्य प्राङ्गणे आयोजिते समारोहे राष्ट्रपतिः द्रौपदी मुर्मुः 'पी. बी. जी.



सोल्जेराथन्' इति धावनस्पर्धायै हरितपताकां दर्शयित्वा उद्घाटनमकरोत्। अस्मिन् अवसरे मिजोरमराज्यस्य राज्यपालः जनरल वी. के. सिंहः अपि उपस्थितः आसीत्। राष्ट्रपतिः अवदत् यत् 'सैनिकानां कृते धावनं, सैनिकैः सह धावनं' इति भावनेन एषा स्पर्धा नागरिकाणां सैन्यबलानां च मध्ये सम्बन्धं सुदृढं कर्तुं श्रेष्ठं माध्यमम् अस्ति।

## इण्डोनेशिया-देशे नौकायाम् अग्निप्रकोपः

इण्डोनेशिया-देशस्य मदुरा-द्वीपस्य समीपे समुद्रे एकस्यां नौकायाम् सहसा अग्निः प्रज्वलिता। अस्मिन् अपघाते २५१ यात्रिषु ५ जनाः मृताः, ४१ जनाः च लुप्ताः सन्ति। देशस्य अन्वेषण-उद्धार-विभागेन २०५ जनाः सुरक्षिताः उद्धृताः, शेषजनानाम् अन्वेषणं प्रचलति।

# Chamba Minjjar Fair - चम्बायां अन्ताराष्ट्रिय-मिञ्जर-मेलापकस्य समापनम्, मुख्यमंत्रिणा सुक्खुना कृतं शोभायात्रायाः नेतृत्वम्







**हिमसंस्कृतवार्ताः — चम्बा ।** चम्बा-मण्डले सप्ताहं यावत् प्रचलतः अन्ताराष्ट्रिय-मिञ्जर-मेलापकस्य २ अगस्त २०२६ दिनाङ्के हर्षोल्लासेन समापनम् अभवत्। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन अस्मिन् अवसरे पारम्परिक-शोभायात्रायाः नेतृत्वं कृतम्। तेन परम्परानुसारं रावी-नद्यां **'मिञ्जर' इत्यस्य विसर्जनम् अपि कृतम्।**

मुख्यमन्त्री 'अखण्ड-चण्डी-पैलेस'-स्थानात् 'मञ्जरी-गार्डन'-पर्यन्तं निसृतायाम् अस्यां शोभायात्रायां सम्मिलितः अभवत्। तेन स्थानीय-देवी-देवतानां भव्यायां शोभायात्रायामपि भागः गृहीतम्। अस्मिन् आयोजने सांस्कृतिक-दलैः स्वकीया प्रस्तुतिः दत्ता। पारम्परिक-वेशभूषायां सज्जिताः महिलाः पुरुषाश्च अपि शोभायात्रायाः अङ्गम् अभवन्। पर्यटकाः अपि अस्य भव्यस्य आयोजनस्य उत्साहेन भागम् अकूर्वन्। पारम्परिक-वाद्य-यन्त्राणि वादयद्भिः कलाकारैः वातावरणं जीवन्तं कृतम्। हिमाचलप्रदेश-आरक्षकस्य (Police) 'होमगार्ड'-इत्यस्य च दलैः अपि अस्मिन् सहभागिता कृता। अस्य भव्य-आयोजनेन चम्बा-मण्डलस्य समृद्ध-सांस्कृतिक-पारम्पर्यः मनमोहकं प्रदर्शनं प्रस्तुतम्।

## मिञ्जर-विसर्जनस्य परम्परा

प्राचीनपरम्परानुसारं मुख्यमन्त्रिणा रावी-नद्यै मिञ्जरः समर्पितः। तेन रक्त-वस्त्रे बद्धं नारिकेलं, ऋतु-फलानि, नाणकं (सिक्का) च सहितस्य मिञ्जरस्य विसर्जनं कृतम्। अस्मिन् अन्तरे तेन प्रदेशे देशे च शान्तेः कामना कृता। मुख्यमन्त्री समृद्धयै सुसस्याय (उत्तम-सस्याय) च अपि प्रार्थनाम् अकरोत्।

## मान्यानां जनानाम् उपस्थितिः

अस्मिन् अवसरे अनेके मान्याः जनाः मुख्यमन्त्रिणा सह शोभायात्रायाम् उपस्थिताः आसन्। एतेषु विधानसभा-अध्यक्षः कुलदीपसिंहपठानिया, राज्य-योजना-मण्डलस्य उपाध्यक्षः भवानीसिंहपठानिया, विधायकः नीरजनैय्यरश्च सम्मिलिताः आसन्। मण्डल-काङ्ग्रेस-अध्यक्षः सुरजीतभरमौरी, ए.पी.एम.सी. चम्बा-अध्यक्षः ललितठाकुरः, काङ्ग्रेस-नेता यशवंतखन्ना च अपि उपस्थिताः आसन्। उपायुक्तः मुकेशरेपसवालः, आरक्षणाधीक्षकः विजयकुमारसकलानी च अमितभरमौरी-सहितं शोभायात्रायाः

# भारतीयज्ञानपरम्पराया आधुनिकतन्त्रिका मस्तिष्कविज्ञानस्य च समन्वये सार्थको विद्वत्समागमः



मण्डीनगरे २०२६ तमवर्षस्य अगस्तमासस्य प्रथमदिने हिमाचलप्रदेशस्थिते भारतीयप्रौद्योगिकीसंस्थानं प्रति तन्त्रिकामस्तिष्कविज्ञानविषये शोधकार्यनिरतेन डॉक्टोरलशोधार्थिना श्रीमोहनपाण्डेयमहाभागेन सह वैदिकगणसंस्थायाः संस्थापकाध्यक्षः श्रीवत्सदेशराजशर्म-महाभागः शिष्टाचारपूर्वकं जग्मतुः। तत्र भाषाविज्ञानस्य मस्तिष्कविज्ञानस्य पाणिनीयव्याकरणस्य भारतीयज्ञानपरम्परायाश्च विविधेषु गम्भीरविषयेषु परस्परमनःप्रसादकरः सुदीर्घः सार्थकश्च विचारविनिमयः समजनि।श्रीमोहनपाण्डेय-महाभागस्य अनुसन्धानम् आधुनिकतन्त्रिका-मस्तिष्कविज्ञानस्य भारतस्य प्राचीनायाः पाणिनीय-व्याकरणपरम्परायाश्च समन्वयमधिष्ठाय प्रवर्तते। स ईईजी इति विद्युत्मस्तिष्कतरङ्गपरिमाणप्रणालीमुपयुज्य मनुष्यस्य मस्तिष्कः शब्दध्वनेरर्थप्रतिपत्तिं कथं क्रमशः सम्पादयतीति विषयमवलोकयति। तस्य शोधप्रयत्नः विशेषतः हिन्दीसंस्कृतभाषयोर्भाषाप्रक्रियाविचारे विकासात्मकतन्त्रिकाविकारपीडितानां विद्यार्थिनां भाषाग्रहणप्रक्रियायां च प्रवर्तते। अनेन भाषावैज्ञानिकाधारेण नूतनशिक्षणपद्धतयः सहायकसाधनानि च विकसितुं शक्यन्त इति तस्याभिप्रायः। अस्मिन् स्नेहसमागमे श्रीवत्सदेशराजशर्ममहाभागेन स्वसम्पादितौ माधवमहिमा तथा ऋतुकाव्यम् इति ग्रन्थौ श्रीमोहनपाण्डेयमहाभागाय सादरं समर्पितौ। तेनैव वैदिकगणसंस्थाया नाम्ना तस्य अनुसन्धानकार्येषु शैक्षिकप्रवृत्तिषु च सर्वथा सहयोगः प्रदास्यत इति प्रतिज्ञातम्। प्रत्युत श्रीमोहनपाण्डेयमहाभागोऽपि वैदिकगणसंस्थाया उद्देश्यान् भारतीयज्ञानपरम्पराया संरक्षणसंवर्धनार्थं प्रवर्तमानाः शैक्षिकशोध-परकप्रवृत्तीश्च सम्यगभिनन्द्य सर्वात्मना सहयोगं करिष्यामीति विश्वासमदात्।समवायस्यास्य परिसमाप्तौ भारतीयज्ञानपरम्पराया आधुनिकवैज्ञानिकानुसन्धानस्य च समन्वयः कालस्य परमावश्यकतेति सर्वैरभ्युपगतम्। भविष्ये संयुक्तशोधकार्याणि शैक्षिककार्यक्रमाः अकादमिकसहकार्यप्रयत्नाश्च अधिकमधिकं प्रवर्धनीयाः इति सौहार्दपूर्णा सम्मतिरपि समजायत।

# हिमाचलप्रदेशेषु सी-श्रेण्याः सेबफलक्रयणस्य दायित्वं 'एचपीएमसी' संस्थायै, आभासी- पंजीकरणम् आरब्धम्



**हिमसंस्कृतवार्ताः- शिमला ।** हिमाचलप्रदेशसर्वकारेण सी-श्रेण्याः सेबफलानां क्रयणाय एचपीएमसी संस्थायै दायित्वं प्रदत्तम् अस्ति। एतां क्रयणप्रक्रियां पारदर्शिकां कर्तुं एमआईएस क्रयणप्रणाल्याः पूर्णतया डिजिटलीकरणं कृतम्। कृषकाणां कृते एमआईएस-अनुप्रयोगे पंजीकरणम् अनिवार्यं वर्तते, अधुना यावत् २५० तः अधिकाः कृषकाः पंजीकरणं कृतवन्तः।

एचपीएमसी- संस्थायाः महाप्रबन्धकः अमनकुमार राणामहोदयः उक्तवान् यत् राज्यस्य विविधेषु सेबफल-उत्पादकक्षेत्रेषु चरणबद्धरूपेण 'एप्पल कलेक्शन सेंटर' (सेबफल-संग्रहण-केन्द्राणि) सञ्चालितानि भविष्यन्ति। प्रथमे चरणे शिमला- मण्डलस्य रोहडू, जुब्बल, चौपाल इति स्थानेषु केन्द्राणि स्थापयिष्यन्ते। मण्डी-मण्डलस्य चिंडी, चच्योट इति क्षेत्रयोः तथा कुल्लू-चम्बा-मण्डलयोः चिह्नितेषु क्षेत्रेषु अपि केन्द्राणि निर्मीयन्ते। तेन उक्तं यत् आवश्यकतानुगुणं अग्रिमचरणेषु अन्येषु क्षेत्रेषु अपि संग्रहणकेन्द्राणि आरप्स्यन्ते।

सफलपंजीकरणानन्तरं कृषकाः एमआईएस-अनुप्रयोगस्य माध्यमेन सी श्रेण्याः सेवफलानां प्रस्तावितमात्रायाः अग्रिमसूचनां दातुं शक्ष्यन्ति। ते स्वकीयानुसारं समीपस्थस्य 'एप्पल कलेक्शन सेंटर' इत्यस्य चयनम् अपि कर्तुं शक्ष्यन्ति। एतेन एचपीएमसी संस्थायै क्रयणस्य समुचित-व्यवस्थां कर्तुं सहायता भविष्यति।

## चलदूरवाणी-अनुप्रयोगेन अपि भवितुं अर्हति पंजीकरणम्

कृषकाः उत्पीठिका-गणकेन अथवा विशेषेण चलदूरवाणी-अनुप्रयोगेन पंजीकरणं कर्तुं शक्नुवन्ति। पंजीकरणप्रक्रियां सरलां कर्तुं ग्रामपञ्चायतेभ्यः सहयोगस्य प्रार्थना कृता अस्ति। एमआईएस अनुप्रयोगः लोकमित्रकेन्द्रैः सह अपि योज्यते, यत्र कृषकाः पंजीकरणाय अन्य- सम्बद्ध- सेबानां कृते च सहायतां प्राप्स्यन्ति।

## 'हिमफेड' संस्था अपि सञ्चालयति संग्रहण- केन्द्राणि

'हिमफेड' संस्था अपि आवश्यकतानुगुणं स्वकीयानि 'एप्पल कलेक्शन सेंटर' सञ्चालयति। एतेषु रामपुरम्, आनी, जुब्बल, ठियोग, जोगिन्द्रनगरसदृशानि स्थानानि समाविष्टानि सन्ति। एचपीएमसी- संस्थया सर्वैः सेबफल-उत्पादक- कृषकैः निवेदनं कृतं यत् असुविधायाः रक्षणाय ते समये पंजीकरणं कुर्वन्तु। पंजीकृत-कृषकाः अनुप्रयोगात् स्वकीयां उपजं समीपस्थे सञ्चालिते संग्रहणकेन्द्रे उपलभ्यं कारयितुं शक्ष्यन्ति।

# मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः चम्बा-मण्डलाय ३३३ कोटि-रूप्यकाणां २६ विकास-परियोजनानाम् उपहारं दत्तवान्



**हिमसंस्कृतवार्ताः — चम्बा** ।हिमाचलप्रदेशस्य मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खूः रविवासरे चम्बा-विधानसभा-क्षेत्राय ३३३.२५ कोटि-रूप्यकाणां व्ययेन निर्मितानां २६ महत्त्वात्मकानां विकास-परियोजनानाम् उपहारम् दत्तवान्। एतासां परियोजनानां लोकार्पणेन शिलान्यासेन च मुख्यमन्त्री क्षेत्रस्य विकासाय नूतनां गतिं दातुं स्वकीयं सङ्कल्पं पुनः प्रोक्तवान्। अस्मिन् अवसरे तेन कथितं यत् प्रदेशसर्वकारः ग्रामीण-सम्पर्कं, स्वास्थ्य-सुविधाः आधारभूत-संरचनां च सुदृढां विधातुं प्रतिबद्धः अस्ति, एताभिः परियोजनाभिः च चम्बा-मण्डलस्य जनेभ्यः प्रत्यक्षः लाभः लप्स्यते।

## चिकित्सा-महाविद्यालयस्य

### चिकित्सालय-भवनस्य च लोकार्पणम्

मुख्यमन्त्री १५८ कोटि-रूप्यकाणां व्ययेन निर्मितस्य 'पण्डित-जवाहरलाल-नेहरू-राजकीय-चिकित्सा-महाविद्यालयः तथा च चिकित्सालयः, चम्बा' इत्यस्य २००-शय्या-युतस्य नूतन-चिकित्सालय-भवनस्य लोकार्पणम् अकरोत्। एषा सुविधा क्षेत्रस्य स्वास्थ्य-सेवासु एकं महत्त्वात्मकं विकासम् आनेष्यति।

### मार्ग-सेतु-परियोजनानां लोकार्पणम्

एतदतिरिच्य, मुख्यमन्त्रिणा अनेकेषां प्रमुखाणां मार्गाणाम् उन्नयनस्य एकस्य महत्त्वात्मकस्य सेतोः (पुल) अपि लोकार्पणं कृतम्। एतेषु शाहपुर-सिहुन्ता-चुवाड़ी-चम्बा-मार्गः, परेल-कोहलड़ी-मार्गः, परेल-मार्ग-चम्बा-बनीखेत-मार्गः, लुड्डू-घरमाड़ी-मार्गः, सराहन-रान-मार्गः, भनेरा-देवीदेहरा-रठियार-मनकोट-मार्गश्च सम्मिलिताः सन्ति। रावी-नद्यां निर्मितस्य करियां-भरियां-कोठी-मार्गे 'बॉक्स-गर्डर'-सेतोः लोकार्पणम् अपि कृतम्, यत् क्षेत्रे आवागमनं सुगमं करिष्यति।

### विविधानां ग्रामाणां सम्पर्क-मार्गाणां वाहन-विश्राम-स्थलस्य (Parking) च शिलान्यासः

मुख्यमन्त्रिणा भगत-मध्ये २५ कोटि-रूप्यकाणां बहतलीय-वाहन-विश्राम-स्थलस्य (चरण-१) शिलान्यासः कृतः। एतेन सह द्रबला, सनोथा, साच-फतेहपुर, नाणु, द्रडा सेरू, घरग्राम, घतरेड़, छांजून, रुंडेगा, बसोधन तथा च मानकोट-सहितानां बहूनां ग्रामाणां सम्पर्क-मार्गाणां निर्माणस्य अपि शिलान्यासः विहितः। एतत् ग्रामीण-क्षेत्रेषु 'संपर्क'-सुविधां सुदृढां विधातुं दिशि एकं बृहत् पदम् अस्ति।

### औषध-भण्डारस्य टीकाकरण-भण्डारस्य च आधारशिला

सरोल-स्थिते कुष्ठ-चिकित्सालय-परिसरे मण्डल-औषध-भण्डारस्य तथा च टीकाकरण-भण्डारस्य आधारशिला अपि स्थापिता। एषा परियोजना स्वास्थ्य-सेवानाम् आपूर्ति-शृङ्खलां सुदृढां विधातुं साहायिका भविष्यति।

### विकासस्य गतिं प्रोत्साहयितुं सङ्कल्पः

मुख्यमन्त्रिणा प्रोक्तं यत् एताभिः परियोजनाभिः न केवलं चम्बा-मण्डलस्य जनेभ्यः प्रत्यक्षः लाभः लप्स्यते, अपितु एतत् प्रदेशसर्वकारस्य विकासोन्मुखीं चिन्तनम् अपि दर्शयति। तेन क्षेत्रस्य सर्वाङ्गीण-विकासाय निरन्तरं प्रयासरतः स्थातुम् आश्वासनं दत्तम्।

# आई.आई.टी.-मण्डी-संस्थानस्य

## अनुसन्धाने महती अभिव्यक्तिः, धान्यस्य कृष्या वर्धितः पञ्जाबस्य भूजल-सङ्कटः




**हिमसंस्कृतवार्ताः — मण्डी ।**

पञ्जाबस्य भूजलं तीव्रगत्या समाप्तं भवन् अस्ति। अस्य महत्तमं कारणं वृष्टौ (वर्षायाम्) न्यूनता न, अपितु धान्य-आधारिता कृषिः सेचनाय भूजलस्य निरन्तरं वर्धमानं दोहनं अस्ति। भारतीय-प्रौद्योगिकी-संस्थानस्य (IIT) मण्डी इत्यस्य २० वर्षाणाम् अध्ययने एषा महत्त्वात्मिका अभिव्यक्तिः अभवत्। अनुसन्धानस्य अनुसारं यदि कृषेः वर्तमानात् पद्धतेः सेचन-व्यवस्थायां च परिवर्तनं न क्रियते, तर्हि आगामि-वर्षेषु राज्यस्य बहुषु भागेषु सेचनेन सह-सह पेजलस्य अपि गम्भीरं सङ्कटं समुत्पत्स्यते। आई.आई.टी.-मण्डी-संस्थायाः 'स्कूल-ऑफ-सिविल-एंड-एनवायरनमेंटल-इंजीनियरिंग' इत्यस्य अनुसन्धानकर्त्री हरसिमरनजीतकौररोमाना, अमेरिका-देशस्य 'चैपमैन-विश्वविद्यालयस्य' प्रो. रमेश-पी.-सिंहः तथा च आई.आई.टी.-मण्डी-संस्थायाः प्रो. डेरिक्स-प्रेज-शुक्लः २००० तमस्य वर्षात् २०२० तमस्य वर्षस्य यावत् भूजलस्य, वर्षायाः, भूजल-सञ्चयस्य (जल-भण्डारणस्य) कृषि-सम्बद्धानाम् विवरणानां (Data) च विश्लेषणम् अकुर्वन्। एतत् अध्ययनं १३ जुलाई-दिनाङ्के प्रतिष्ठितायाम् अन्ताराष्ट्रियायां पत्रिकायां (Journal) 'एडवांसेस-इन-स्पेस-रिसर्च' इत्यस्यां प्रकाशितम् अभवत्। अध्ययने प्राप्तं यत् द्वयोः दशकयोः अवधौ पञ्जाबे वर्षायां कापि उल्लेखनीय-दीर्घकालिक-न्यूनता न पञ्जीकृता, परन्तु सेचनाय भूजलस्य दोहनं निरन्तरं वर्धमानम् अभवत्। अनेन स्पष्टं जातं यत् वर्तमानं भूजल-सङ्कटं प्राकृतिक-कारणात् न, अपितु मानव-जनितानां गतिविधिनां परिणामः अस्ति। अनुसन्धानकर्तृणाम् अनुसारं धान्य-कृषेः निरन्तर-विस्तारेण 'ट्यूबवेल'-माध्यमेन च बृहत्-परिमाणे भूजल-निष्कासनेन जल-स्तरं तीव्रगत्या अधः क्षिप्तः।

### दक्षिण-पश्चिम-पञ्जाबः सर्वाधिकः प्रभावितः

अनुसन्धानस्य अनुसारं दक्षिण-पश्चिम-पञ्जाबस्य मुक्तसर, बठिण्डा, फिरोजपुर, मानसा तथा च मोगा-मण्डलानि सर्वाधिकं प्रभावितानि सन्ति। २०१५ तमस्य वर्षस्य परं भूजल-सञ्चये अवनतिः इतोऽपि तीव्रा जाता तथा च २०१८ तः २०२० तमस्य वर्षस्य मध्ये बहुषु क्षेत्रेषु जल-स्तरः निम्नतमे स्तरे सम्प्राप्तः। बठिण्डा, पटियाला, सङ्गरूर, बरनाला, लुधियाना, जालन्धर तथा च मोगा-क्षेत्रेषु भूजल-सञ्चये सर्वाधिका अवनतिः पञ्जीकृता। अध्ययने एतदपि सम्मुखम् आगतं यत् सेचन-योग्यस्य भूजलस्य गुणवत्ता निरन्तरं विकरति। 'सोडियम-एडसॉर्प्शन-रेशियो' (SAR) इत्यस्य आधारेण अनुपयुक्त-क्षेत्राणां सङ्ख्या २००० तमे वर्षे १३ आसीत्, या २०२० तमे वर्षे वर्धित्वा २० अभवत्। तत्रैव 'सोडियम-प्रतिशत' इत्यस्य आधारेण एषा सङ्ख्या १२ तः वर्धित्वा ४७ यावत् सम्प्राप्ता। अस्य अर्थः अस्ति यत् राज्यस्य बहुषु क्षेत्रेषु भूजलं न केवलं न्यूनं भवन् अस्ति, अपितु कृष्यै तस्य गुणवत्ता अपि तीव्रगत्या दुष्टा भवन्ती अस्ति।

# प्रियङ्का-गाँधी-वर्यया 'मुख्यमन्त्री-अपना-सुखी-परिवार-योजना' इत्यस्याः आरम्भं कारयितुं सज्जता

### हिमाचले २.५० लक्ष-महिलाः लप्स्यन्ते १५०० रूप्यकाणि

हिमसंस्कृतवार्ताः — शिमला । हिमाचलप्रदेशस्य सर्वाधिक-निर्धन-परिवाराणां कृते मण्डी-मण्डलात् 'मुख्यमन्त्री-अपना-सुखी-परिवार-योजना' इत्यस्याः शुभारंभं कर्तुं सज्जीकरणं क्रियमाणम् अस्ति। अखिल-भारतीय-काङ्ग्रेस-महासचिवया तथा च सांसदेन प्रियङ्का-वाड्रा-गाँधी-वर्यया सह १५ अगस्त-दिनाङ्कस्य समयः याचितः आसीत्, परन्तु तस्याः व्यस्ततायाः कारणेन अधुना तस्याः १८ अगस्त-दिनाङ्के आगमनस्य सम्भावना प्रकटीक्रियमाणा अस्ति। तादृशे 'मुख्यमन्त्री-अपना-सुखी-परिवार-योजना' इत्यस्याः अन्तर्गतं प्रदेशस्य प्रायः १.७८ लक्ष-अति-निर्धन-परिवाराः सामाजिक-सुरक्षायाः परिधौ आनेष्यन्ते। तत्रैव 'इन्दिरा-गाँधी-प्रिय-भगिनी-सुख-सम्मान-निधि-योजना' इत्यस्याः अन्तर्गतं एतेषां परिवाराणां तथा च पात्राणां २.५० लक्षात् अधिकानां महिलानां सञ्चय-कोषेषु (Bank Accounts) १५०० रूप्यकाणि प्रतिमासं सम्मान-निधि-योजना आरप्स्यते। एषा सम्मान-निधिः साक्षात् 'डी.बी.टी.' (Direct Benefit Transfer) इत्यस्य माध्यमेन वित्तकोष-संख्यासु आगमिष्यति।




### लाभान्वितानाम् 'विवरणं' सज्जीकर्तुं संलग्नः सर्वकारः

मण्डी-मध्ये आयोज्यमाने कार्यक्रमे अखिल-भारतीय-काङ्ग्रेस-महासचिवया प्रियङ्का-गाँधी-वाड्रा-वर्यया उपस्थितौ योजनायाः औपचारिकः शुभारम्भः कर्तुं सज्जीकरणं क्रियमाणम् अस्ति। सर्वकारः लाभान्वितानाम् अन्तिमम् 'विवरणं' सज्जीकर्तुं संलग्नः अस्ति, येन राशिः साक्षात् पात्राणां महिलानां वित्तकोष-संख्यासु प्रेषयितुं शक्येत।

### ३४ सहस्रं महिलाः लभन्ते लाभम्

वर्तमाने प्रायः ३४ सहस्रं पात्राः महिलाः १५०० रूप्यकाणां सम्मान-निधेः लाभं प्राप्नुवन्ति। नूतनायां व्यवस्थायां प्रवर्तित-कृतायां सत्यां लाभान्वितानां सङ्ख्या त्रि-लक्षात् पारं भविष्यति।

# आर्यगौरवपुरस्कारेण डॉ. सुमनरानी- महोदयायाः सम्माननम्



**हिमसंस्कृतवार्ता।** हरियाणाप्रदेशस्थेन आर्यसमाजस्य महेन्द्रगढ- जिला- वेदप्रचार- मण्डलेन "कृण्वन्तो विश्वमार्यम्" इति वैदिकं महल्लक्ष्यमालक्ष्य वैदिकसंस्कृतेः सेवायाः क्षेत्रे हरियाणा- केन्द्रीय- विश्वविद्यालये सहायकाचार्यायाः स्वामी दयानन्द- सरस्वती- पीठस्य अध्यक्षायाः वैदिक संस्कृतेः प्रचारप्रसाराय अहर्निशं निरतायाः डा. सुमनरानी महोदयायाः अपरिमितं योगदानमूरीकृत्य **आर्यगौरव-पुरस्कारेण** सभाजितेयं वैदिकविदुषी।अयं सम्मानः सरस्वती- विद्यामन्दिर- वरिष्ठ- माध्यमिक- विद्यालये, नाङ्गल चौधरी (महेन्द्रगढ) इतिग्रामे आयोजिते विशिष्टे समारोहे प्रदत्तः। समारोहेऽस्मिन् वक्तृभिः उक्तं यत् डॉ. सुमनरानी महोदया वैदिकधर्मस्य, भारतीयज्ञानपरम्परायाः, संस्कृतभाषायाश्च संरक्षणे, संवर्धने, प्रचार-प्रसारे च निरन्तरं समर्पितभावेन कार्यं कुर्वन्ती सन्ति। तासां नेतृत्वे स्वामी दयानन्द-सरस्वती-पीठेन अनेकाः राष्ट्रियाः, अन्ताराष्ट्रियसंगोष्ठ्यः, व्याख्यानमालाः, संस्कृत-प्रतियोगिताः, भारतीयसंस्कृतेः प्रचाराय कार्यक्रमाश्च सफलतया समायोजिताः।

सम्मानसमारोहे वक्तारः अवदन् यत् डॉ. सुमनरानी महोदयायाः विद्वत्ता, संगठनकौशलं, समाजसेवाभावश्च यूनां कृते प्रेरणास्पदं वर्तते। वैदिकमूल्यानां प्रतिष्ठापनाय, युवक-युवतिषु सांस्कृतिकमूल्यानां संस्काराणां चाधानाय, राष्ट्रनिर्माणे च तासां योगदानमतीव प्रशंसनीयमिति सर्वैरेव वक्तृभिः भूरिशः प्रतिपादितम्।अन्ते च आयोजकैः ईश्वरं प्रति प्रार्थना कृता यत् डॉ. सुमनरानी महोदयाः दीर्घमायुष्यम्, उत्तमम् आरोग्यं च प्राप्नुयुः, महर्षिदयानन्देन प्रतिपादितानां वैदिकसिद्धान्तानां प्रचार-प्रसारे, समाजसेवायां, राष्ट्रहितकार्येषु च निरन्तरमग्रे सरन्तु च इति ।

# बोकारोनगरे मोहम्मद-रफी-महोदयस्य पुण्यतिथौ 'एका सायं रफी-महोदयस्य नाम्नि' इति संगीतकार्यक्रमस्य आयोजनम्



## त्वं मां एवं न विस्मर्तुं शक्नोषि... सायं प्रातश्च त्वां स्मरामि..

हिमसंस्कृतवार्ताः:- सौरभ दे, बोकारो। सुप्रसिद्धस्य चलच्चित्रपार्श्वगायकस्य मोहम्मद रफी- महोदयस्य पुण्यतिथ्यां शुक्रवासरस्य सायंकाले बोकारोनगरस्य सेक्टर–१२ क्षेत्रे 'एका सायं रफी-महोदयस्य नाम्नि' इति संगीतकार्यक्रमस्य आयोजनं कृतम्। अस्मिन् कार्यक्रमे कलाकारैः स्वसुमधुरगीतप्रस्तुतिभिः तस्मै भावपूर्णा सङ्गीताञ्जलिः समर्पिता। स्वरागिनी म्यूजिकल-ग्रुप इत्यस्य तत्त्वावधाने रमणचौधरी-महोदयेन रागिनी सिन्हा- अम्बष्ठ- महाभागया च संयोजितस्य अस्य कार्यक्रमस्य प्रारम्भे प्रसिद्धगायकाः अरुणपाठकः, रमणचौधरी, सोमेशमिश्रः, रिद्धिमा, श्वेताप्रियदर्शिनी, वरिष्ठरङ्गकर्मी सङ्गीतप्रेमी शम्भुझा, गङ्गेशकुमारपाठकः, प्रवीणकुमारसिंहः च मोहम्मद रफी महोदयस्य चित्रे माल्यार्पणं पुष्पाञ्जलिं च समर्प्य श्रद्धांजलिम् अर्पितवन्तः।

वक्तारः अवदन् यत् मोहम्मद रफीमहोदयः भारतीयचलच्चित्रसङ्गीतस्य महान् पार्श्वगायकः आसीत्। तेन विविधप्रकाराणि गीतानि स्वमधुरकण्ठेन गीयमानानि अमरत्वं प्राप्तानि। चलच्चित्रसङ्गीतस्य जन-जनपर्यन्तं प्रसारणे तस्य योगदानम् अत्यन्तं प्रशंसनीयम् आसीत्। यावत् सङ्गीतम् अस्ति, सङ्गीतप्रेमिणश्च सन्ति, तावत् रफी-महोदयः सदैव आदरेण स्मरिष्यते।

अस्मिन् अवसरे अरुणपाठकः 'तुम मुझे यूँ भुला ना पाओगे', 'चाहूँगा मैं तुझे साँझ सवेरे', 'मैं एक राजा हूँ, तू एक रानी है', 'हुस्न वाले तेरा जवाब नहीं', 'पूछे जो कोई मुझसे बहार कैसी होती है', 'जिस रात के ख़्वाब आए', 'हुई शाम उनका ख़याल आ गया' इत्यादीनि गीतानि तथा रिद्धिमा-रीया सह युगलगीतं 'छुप गए सारे नज़ारे, ओए क्या बात हो गई' इति सुमधुररूपेण प्रस्तुतवान्। रमणचौधरी 'कैसे कटेगी ज़िंदगी तेरे बगैर', 'यहाँ मैं अजनबी हूँ', 'दिन ढल जाए', 'छू लेने दो नाज़ुक होठों को' इत्यादीनि गीतानि प्रस्तुतवान्। सोमेशमिश्रः 'ना किसी के आँख का नूर हूँ', 'कभी रात दिन हम दूर थे', 'तुम जो मिल गए हो' इत्यादीनां गीतानां भावपूर्णप्रस्तुत्या रफी-महोदयाय श्रद्धाञ्जलिम् अर्पितवान्।

# विनोदकणिका

अद्य ग्वालः (दुग्धविक्रेता) अवदत्- श्वः आरभ्य रोगप्रतिरोधकशक्तिं वर्धनार्थं क्षीरं दातव्यम् वा? अहं पृष्टवान् यद् एतत् कीदृशं क्षीरम् अस्ति? क्षीरविक्रेता अवदत्- वयं एकां महिषीं गिलोय, तुलसीपर्णानि, आर्द्रकम्, कृष्णः मरिचः, अजमोदा एवं गुडमिश्रितं क्वाथः प्रातःकाले सायंकाले च पास्यामः। विटामिन-सी इत्यस्य कृते जम्बीरं, नारिङ्गानि च खादितुम् दीयन्ते।

विटामिन- डी कृते प्रतिदिनं एकहोरा आतपे बन्धनं कृत्वा स्थाप्यते। अस्या महिष्यां क्षीरं पीत्वा भवतः रोगप्रतिरोध शक्तिं वर्धते। एतत् सर्व केवलं (१०) दशरूप्यकाणि अधिकं व्ययः भविष्यति। अहं अवदम् इदानीं त्वमपि लुण्ठसि।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# चलच्चित्रवार्ता दशमे दिने थलपति-विजयस्य 'जन नायकन्' इति चलच्चित्रस्य अर्जने तीव्रवृद्धिः, चलच्चित्रमिदं ७.८० कोटिरूप्यकाणि अर्जितवत्




**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।** 'जन नायकन्' इति थलपति-विजयस्य अन्तिमं चलच्चित्रम् अस्ति। अधुना तस्य कृते चलच्चित्रेषु कार्यकरणं प्रायः असम्भवम् अस्ति, यतो हि सः मुख्यमन्त्री अभवत्। 'जन नायकन्' विजयस्य अन्तिमं चलच्चित्रम् अस्ति इति कारणेन एषा आशा आसीत् यत् एतत् बॉक्स ऑफिस मध्ये ५००-६०० कोटिरूप्यकाणां अर्जनं करिष्यति, किन्तु तथा नाभवत्। तथापि चलच्चित्रस्य प्रदर्शनं मन्दमपि नासीत्। मुक्तात् पूर्वं पटलात् प्रकटीकृते सति अपि एतेन शोभनम् अर्जनं कृतम्। थलपति-विजयस्य 'जन नायकन्' इति चलच्चित्रं जुलाईमासस्य त्रयोविंशतितमे दिनाङ्के चलच्चित्रगृहेषु प्रदर्शितम् अभवत्। चलच्चित्रस्य प्रदर्शनात् दश दिनानि व्यतीतानि। प्रारम्भिकदिनेषु एतेन प्रबला प्रायः सुदृढा वा आयप्राप्तिः कृता, किन्तु गतेषु कतिपयदिनेषु अस्य अर्जने अपचयः (ह्रासः) दृष्टः। चलच्चित्रस्य दैनिकी आयः ४ कोटिरूप्यकेभ्यः अपि न्यूनताम् अगच्छत्। तथापि दशमे दिने अस्य अर्जने तीव्रवृद्धिः अभवत्। वृत्तविवेचनानुसारं दशमे दिने चलच्चित्रेण ७.८० कोटिरूप्यकाणां सङ्ग्रहः कृतः। एतेन सह एव देशीयबॉक्स ऑफिस मध्ये अस्य चलच्चित्रस्य आहत्य अर्जनं १६४.९० कोटिरूप्यकाणि सञ्जातम्।

# अन्धानुकरणं सङ्कटाय, काचिल्लघुकथा




कस्यचन कृषकस्य दशमेषाः आसन्। स मेषयूथः सदैव तृणाय किञ्चन वनं प्रविशति स्म। तृणखादनाय यत्रापि गन्तव्यं भवति तेषु कश्चन मुख्यमेषः सदैव तेषाम् अग्रतः तिष्ठन् अग्रगामी भवति स्म। इतरे मेषाः तम् अनुकुर्वन्तः अग्रे सरन्ति स्म। वनमध्ये एका नदी प्रवाहमाना आसीत्, विचरणसमये यथाकालं ते तत्रैव जलं पिबन्तः तृष्णातः सन्तृप्ताः भवन्ति स्म। एकदा स यूथमुख्यः अचिन्तयद् यत् अत्र तु घासः शनैः न्यूनतां गतोस्ति, अतः नद्याः अपरे तीरे यथेष्टं घासः स्यात् सम्भवतः, तस्माद् अपरतीरं प्राप्य आरुचि मया खादनीयमिति। एवं विचिन्त्य सः नद्यां कस्यचन प्रवहतः आगतस्य काष्ठखण्डस्योपरि, सहसा कूर्दयित्वा, नदीपारं प्राप्तुं तदारूढवान्, तद्दृष्ट्वा अन्ये अनुचराः मेषाः अपि झटिति तम् अनुकुर्वन्तः तत्काष्ठखण्डम् आरूढवन्तः। लघुकाष्ठखण्डन्तत्, तस्मात् तेषां भारेण तत् सहसा जले निमज्जितः अभवत्। तदा मेषनायकेन सह ते सर्वे तस्मिन् गभीरजले निमज्ज्य स्वप्रियप्राणान् अपि त्यक्तवन्तः। तस्मात् अन्धानुकरणं न कदापि कर्तव्यमिति कथायाः तात्पर्यमिति।

# झारखण्डराज्यस्य देवगृहजनपदे देवगृहे श्रावणमासे विशाला काँवरयात्रा



**हिमसंस्कृतवार्ताः- आशुतोष पाण्डेयः, देवगृहम्।** झारखण्डराज्यस्य देवगृहजनपदे विद्यमानं प्रसिद्धं बाबावैद्यनाथधाम भारते स्थितेषु द्वादशज्योतिर्लिङ्गेषु एकपञ्चाशच्छक्तिपीठेषु च अन्यतमं विद्यते। अत्र विद्यमानेषु लिङ्गेषु इदं याथार्थ्येन मनोकामनालिङ्गम् अस्ति। तथैकपञ्चाशद्वा द्विपञ्चाशच्छक्तिपीठेषु अत्र हृदयपीठं विद्यते यतो हि सतीदेव्याः हृदयमत्रैवापतत्। पौराणिककथानामनुसारं लङ्कापतिरावणः लङ्कायां ज्योतिर्लिङ्गं स्थापयितुं कैलासपर्वते भगवतः शिवस्य कठोरं तपस्यामकरोत् सः शिवान्महादेवान् तज्ज्योतिर्लिङ्गं लङ्कां नेतुं वरमयाचत च। किन्तु विष्णुदेवस्य लीलया मार्गे रावणः तत् पवित्रं लिङ्गं पशुपालकबैजुरूपधारिणे विष्णवे किञ्चित्कालार्थं धर्तुमददात् सः च तल्लिङ्गं भूमौ अस्थापयत् येन तत् तत्रैव स्थापितमभूत्। यतो हि शिवोऽत्र भक्तानां रोगान् दुःखानि च अहरत् तेन वैद्यानां नाथ इति कारणाद् अस्य वैद्यनाथ इति नाम प्रसिद्धमभवत्। ऐतिहासिकप्रमाणानुरूपम् अस्य मन्दिरस्य मुख्यं निर्माणम् अष्टमशताब्द्यां गुप्तसम्राट्सेनादित्यः अकारयत् तथा च पञ्चदशशताब्द्यां षोडशशताब्द्यां वा गिद्धौरनृपमल्लपूरणः अस्य पुनरुद्धारम् अकरोत्। काँवरयात्रायां विहारराज्यस्य सुल्तानगञ्जस्थितम् अजगैबीनाथधाम प्राप्य भक्ताः उत्तरवाहिन्याः गङ्गायाः पवित्रं जलं काँवरनामकपात्रे पूरयन्ति। ततः काषायवस्त्राणि धृत्वा श्रद्धालुजनाः बोलबम इति घोषं कुर्वन्तः पञ्चाधिकशत- किलोमितमानदूरतो नवाधिकशत- किलोमितमानदूरपर्यन्तं नग्नपादाः एव यात्राम् कुर्वन्ति। यात्राकाले काँवरपात्रस्य भूमौ स्थापनं निषिद्धं विद्यते तस्मात् तत् पवित्रे उन्नते वा स्थाने एव विश्रामार्थं स्थाप्यते। देवगृहम् प्राप्य प्रथमं ते शिवगङ्गासरोवरे स्नात्वा स्वान् पवित्रीकुर्वन्ति ततश्च बाबावैद्यनाथाय गङ्गाजलमर्पयन्तम् अद्यतनीयदिनात् पञ्चदशदिनेभ्यः पूर्वं विश्रब्धाः वङ्गप्रदेशीयभक्ताः श्रद्धया काँवरयात्राम् कृत्वा प्रभवे जलम् आर्पयन्। सम्प्रत्यपि भक्तानां महान् सम्मर्दः तत्र विद्यते। श्रावणमासस्य प्रथमदिने एव लक्षाधिकैः श्रद्धालुभिः श्रद्धया शान्तिपूर्वकं च भूतभावनाय शिवाय जलम् आर्प्यत। विहारराज्यात् झारखण्डराज्यम् प्रापकमार्गे सर्वकारेण स्थाने स्थाने उत्तमाः व्यवस्थाः कृताः सन्ति। केचन अन्तर्जाललेखकाः अन्तर्जालदृश्यप्रसारकाः उच्चाधिकारिणश्च स्वकीयान् शिबिरान् स्थापयन्ति यत्र बोलबम इति यात्रिभ्यः विश्रामस्य फलाहारस्य सुविधानाञ्च व्यवस्था दीयते। वर्तमानसम्मर्दं पङ्क्तीश्च दृष्ट्वा अनुमीयते यत् सोमवासरे त्रिलक्षादारभ्य चतुर्लक्षपर्यन्तं भक्ताः पूजनं करिष्यन्ति। शिवलोकयात्रिणां क्लममपनोदनाय शिवलोके भक्तिगीतानां झांकी इति नामकदृश्यप्रदर्शनानां नृत्यकलाकाराणाञ्च माध्यमेन स्थानीयकलाकारेभ्यः नूतनसङ्गीतकारेभ्यः नर्तकेभ्यश्च अवसराः प्रदीयन्ते। अष्टादशाधिकद्विसहस्रतमकृष्टाब्दात् प्रचलन्त्यां शिवलोकपरम्परायाम् प्रतिवर्षं कानिचिन् नूतनानि अलङ्कृतानि च दृश्यानि प्रदर्श्यन्ते। सम्प्रति भोजपुरी इति स्थानीयगीतानां स्थाने भक्तिगीतैः शिवलोकपरिसरः देवगृहञ्च नृत्यति तथा च काचतालमाध्यमेन वैद्यनाथधाम्नः अतीतमपि प्रदर्श्यते।अत्र शिवमहापुराणस्य कोटिरुद्रसंहितायाम् एतद्विषये स्पष्टमुक्तम् पूर्वोत्तरे प्रज्वलिकानिधाने सदा वसन्तं गिरिजासमेतम् सुरासुराराधितपादपद्मं श्रीवैद्यनाथं तमहं नमामि इति। एतच्च मन्दिरे भक्तानाम् अपारश्रद्धां पश्यन् मनसि आयाति उत्तममुक्तं शास्त्रेषु यद् भक्त्या तुष्यति शिवः न तु केवलमुपचारैः॥



हिमसंस्कृतवार्ताः, ईदरधीररजः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया काश्चन विचित्राः वार्ताः आनीताः। प्रथमा वार्ता डेनमार्क-देशात् अस्ति। तत्र कैश्चित् चिक्रोडैः एकः शुष्कफल-आपणः लुण्ठितः।

**नन्दिनी-** अहो, चिक्रोडैः आपणः लुण्ठितः! महदाश्चर्यम्। मया अपरा वार्ता श्रुता। एकेन ग्रामेण राष्ट्रभारः निषिद्धः। केनचित् कराणाम् विरोधे मतं दत्तम्, परन्तु भ्रान्त्या गुरुत्वाकर्षणस्य नियमः एव निष्कासितः।

**काव्या-** गुरुत्वाकर्षणस्य नियमः निष्कासितः? हास्यकरम् एतत्! अन्या वार्ता यन्त्रसम्बन्धिनी अस्ति। दक्षिणकोरिया-देशे एकेन प्रज्ञायुक्तेन शीतकेन तस्य स्वामी बहिः निरुद्धः। स्वामिना अधिकं भोजनं खादितम्, अतः यन्त्रेण द्वारं पिहितम्।

**नन्दिनी-** शीतकेन द्वारं पिहितम्? जनैः यन्त्राणां दासत्वं प्राप्तम्। महासागरे काचित् रहस्यमयी नौका प्राप्ता। तस्यां नौकायां कोऽपि नाविकः न दृष्टः, परन्तु पीठेषु भोजनं स्थापितम्।

**काव्या-** रहस्यमयी नौका प्राप्ता इति भयानका वार्ता! अन्तिमा वार्ता क्रीडाविषये अस्ति। महानगरे जनैः एका नवीना प्रतीक्षा-क्रीडा आरब्धा। तत्र एकः जनः दिनद्वयम् यावत् अचलः स्थितवान् अस्ति। परन्तु सः जनः न, अपि तु काचित् पुत्तलिका, इति कैश्चित् ज्ञातम्।

**नन्दिनी-** पुत्तलिका? जनाः अतीव धूर्ताः सन्ति। सर्वाः वार्ताः अतीव विचित्राः। धन्यवादः काव्ये।

### राष्ट्रमण्डल-क्रीडाः २०२६

## पुरुष-दीर्घकूर्दने मुरली-श्रीशङ्करेण रजतपदकं जितम्



ग्लास्गो-नगरे आयोजितासु राष्ट्रमण्डल-क्रीडासु २०२६ (कौमनवेल्थ-गेम्स्) मुरली-श्रीशङ्करः पुरुष-दीर्घकूर्दन-स्पर्धायां रजतपदकं प्राप्तवान्। क्रमेण द्वितीयेषु राष्ट्रमण्डल-क्रीडामहोत्सवेषु एतत् तस्य द्वितीयं पदकम् आसीत्। सप्तविंशतिवर्षीयः (२७) मुरली-श्रीशङ्करः ८.०९ मीटर्-परिमितस्य स्वस्य सर्वश्रेष्ठस्य प्रयासस्य बलेन एतत् पदकं प्राप्तवान्। श्रीशङ्करः बर्मिङ्घम्-२०२२ क्रीडास्वपि रजतपदकं जितवान् आसीत्।सः जमैका-देशस्य पूर्व-विश्वविजेतुः ताजे-गेल-महोदयात् पृष्ठतः अभवत्, येन स्कॉटस्टाउन्-क्रीडाङ्गणस्य धावनमार्गे ८.१५ मीटर्-परिमितः दीर्घाङ्कः प्राप्तः। स्कॉटलैण्ड-देशस्य स्टीफन्-मैकेञ्जी-महोदयः ८.०८ मीटर्-परिमित-कूर्दनेन कांस्यपदकं जितवान्। स्पर्धायाः अर्धावधिं यावत् श्रीशङ्करः अग्रे आसीत्, किन्तु चतुर्थे पर्याये ताजे-गेल-महोदयः उत्कृष्टं प्रदर्शनं कुर्वन् विजयप्रदं कूर्दनम् अकरोत्। भारतीय-क्रीडालोः श्रीशङ्करस्य षट्-प्रयासेषु ८.०३ मीटर्, ८.०९ मीटर्, द्वौ असफल-प्रयासौ (फाउल), ७.९४ मीटर्, तथा च ७.९७ मीटर्-परिमित-कूर्दनानि समाविष्टानि आसन्।



## दिलीपस्य स्वर्णिम-धावनम्, बासिलेन गृहीतं रजतम्

भारतीय-क्रीडालुः दिलीप-गावितः पुरुषाणां टी-४७ १०० मीटर् पैरा-एथलेटिक्स्-स्पर्धायां शानदारं प्रदर्शनं कुर्वन् ऐतिहासिकं स्वर्णपदकं जितवान्। दिलीप-गावितः पुरुषाणां टी-४७ १०० मीटर्-धावने १०.७१ क्षणेषु (सेकण्ड्स्) कालं प्राप्य क्रीडा-कीर्तिमानं (Games Record) तथा च एतस्य सत्रस्य स्वस्य सर्वश्रेष्ठं समयं रचयन् स्वर्णपदकं प्राप्तवान्। तस्मिन्नेव समये, तस्य सहक्रीडालुः मोहम्मद-बासिल-मोर्सिङ्गनाकथः १०.८३ क्षणेषु धावनं पूर्णं कृत्वा रजतपदकं जितवान्। अनेन ऐतिहासिक-प्रदर्शनेन सह, दिलीप-महादु-गावितः पैरा-एथलेटिक्स्-विभागे राष्ट्रमण्डल-क्रीडासु स्वर्णपदकं प्राप्तवान् प्रथमः भारतीय-पुरुष-क्रीडालुः अभवत्। एतेन सह एव, महिलानां गोलक-क्षेपणे (Shot Put F57) शर्मिलायाः स्वर्णपदकस्य अनन्तरम्, राष्ट्रमण्डल-क्रीडासु पैरा-एथलेटिक्स्-विभागे पदकं प्राप्नुवान् सः कुलरूपेण द्वितीयः भारतीय-पैरा-क्रीडालुः अस्ति। तस्य सहक्रीडालुः भारतीयः लोकेश-सत्यनाथनः ७.९७ मीटर्-परिमित-प्रदर्शनेन पञ्चमे स्थाने आसीत्। पैरा-एथलेटिक्स्-विभागे सागर-थायतः तथा च देवेन्द्र-कुमारः पुरुषाणां चक्र-क्षेपणे (Discuss Throw F42-44/F61-64) अन्तिम-स्पर्धायां क्रमशः षष्ठे तथा च सप्तमे स्थाने आस्ताम्।



## हास्यकणिका

- डॉ. विदुषी अग्रवाल

श्वश्रूः वदति- "स्नुषा कदापि दुहिता न भवितुमर्हति।"

स्नुषा वदति- "यदि अहं भवतः दुहिता भवेयं, तर्हि पत्युः भगिनी भूत्वा लोकाय किं मुखं दर्शयेयम्?" 🤣 😄